ଓଡ଼ିଶା ରାଜ୍ୟ ମୁକ୍ତ ବିଶ୍ୱବିଦ୍ୟାଳୟ, ସମ୍ବଲପୁର, ଓଡ଼ିଶା
Odisha State Open University, Sambalpur, Odisha
Established by an Act of Government of Odisha.

# Master of Arts in Sanskrit (MASK)

## SK-07
## LINGUISTICS

## Block -04

## Indo-Iranian Languages


UNIT- 1 VEDIC SANSKRIT

UNIT-2 CLASSICAL SANSKRIT

UNIT-3 AVESTA

UNIT-4 PALI AND PRAKRIT

MASK PROGRAMME

**EXPERTS COMMITTEE**

**Prof. Prafulla Kumar Mishra, Former Vice-Chancellor, North Odisha University**

**Prof. Raghunath Panda , Retd. Prof, Utkal University**

**Prof. Gopal Krishna Dash, Retd. Prof. , Utkal University**

**Dr. Madhusudan Mishra, Controller of Exams , Sri Jagannath Sanskrit University, Puri**

**Dr. Harmohan Mishra , Reader ( Retd.)**

**Dr. Kadambini Dash , Reader in Sanskrit, SB Womenôs College,**

**Dr. Debabrata Mohapatra , Sr . Lect. In Sanskrit, Emartidevi Womenôs College,Cuttack**

**Dr. Nibedita Pati, Lecturer in Sanskrit , S.B Womenôs College**

**CONVENOR**

**Dr. Dillip Kumar Nayak , Reader in Odia ,**
**Former Officer In Charge, Regional Centre, B.J.B Auto. College Bhubaneswar**

**COURSE WRITER**

**Dr. Prahallad Debta , Lecturer in Sanskrit , Barpali College Barpali**

**COURSE EDITOR**

**Dr. Madhusudan Mishra, Associate Professor, B.J.B Auto. College Bhubaneswar**

**PROGRAMME COORDINATOR**

**Dr. Sareeta Pujari , Senior Academic Consultant, OSOU , Sambalpur**

**Mr. Pratap Kumar Meher , Academic Consultant , Sanskrit , OSOU, Sambalpur**

**MATERIAL PRODUCTION**

**Dr. Manas Ranjan Pujari**
**Registrar**
**Odisha State Open University, Sambalpur**

(cc) OSOU, 2020. Indo-Iranian Languages is made available
under a Creative Commons Attribution-ShareAlike 4.0
http://creativecommons.org/licences/by-sa/4.0
Printed by :

## BLOCK - IV INDO-IRANIAN LANGUAGE

**UNIT - I - वैदिकसंस्कृतम् / Vedic Sanskrit**

**1.1.** भारत-ईरानीभाषायाः परिचयः

**1.2.** वैदिकसंस्कृतस्य सामान्यः परिचयः

**1.2.1.** वैदिकभाषायाः ध्वनयः

**1.2.2.** वैदिकभाषायाः वैशिष्ट्यम्

**UNIT - II -** लौकिकसंस्कृतम् /**Classical Sanskrit**

**2.1.** लौकिकसंस्कृतस्य सामान्यपरिचयः

**2.1.2** लौकिकसंस्कृतस्य ध्वनयः

**2.1.3.** लौकिकसंस्कृतस्य वैशिष्ट्यम्

**2.1.4.** वैदिकसंस्कृतलौकिकसंस्कृतयोर्मध्ये साम्यं वैषम्यञ्च।

**UNIT - III** अवेस्ता /**Avesta**

**3.1.** अवेस्तायाः सामान्यपरिचयः

**3.1.2** वैदिकावेस्तयोर्मध्ये साम्यं वैषम्यञ्च

**3.1.3.** पश्चिमीरानी प्राचीनफार्सी वा

**UNIT - IV** पालिः प्राकृतञ्च /**Pali and Prakrit**

**4.1.** प्राकृतस्य सामान्यपरिचयः

**4.2.** पालिभाषायाः उत्पत्तिः परिचयश्च

4.2.1. पालिसाहित्यं वैशिष्ट्यञ्च

4.2.2. पालिभाषायाः ध्वनयः

4.2.3. संस्कृतेन सह पालिभाषायाः साम्यं वैषम्यञ्च

4.2.4. शिलालेखीप्राकृतं वैशिष्ट्यञ्च

4.3. प्राकृतस्य उत्पत्तिः परिचयञ्च

4.3.1. प्राकृतस्य भेदः

4.3.2. मागधीप्राकृतस्य परिचयः वैशिष्ट्यञ्च

4.3.3. अर्द्धमागध्याः परिचयः वैशिष्ट्यञ्च

4.3.4. महाराष्ट्रीप्राकृतस्य परिचयः वैशिष्ट्यञ्च

4.3.5. शौरसेन्याः परिचयः वैशिष्ट्यञ्च

4.3.6. पैशाच्याः परिचयः वैशिष्ट्यञ्च

4.3.7 द्वितीयप्राकृतस्य वैशिष्ट्यानि

4.4. तृतीयप्राकृतं अपभ्रंशः वा

4.4.1. अपभ्रंशस्य भेदाः

4.4.2. अपभ्रंशस्य वैशिष्ट्यम्

**5.1. Model Questions**
**6.1. Further Reading**

## 1.1. भारत-ईरानीभाषायाः परिचयः

विश्वभाषाणां वर्गीकरणमाधारीकृत्य विश्वस्य सर्वाः भाषाः चतुर्षु खण्डेषु विभक्ताः भवन्ति। तेषु युरेशीयाखण्डं स्वतन्त्रं महत्वपूर्णञ्च। युरेशियाखण्डे विद्यमानेषु भाषापरिवारेषु भारोपीयपरिवारः महत्वपूर्णःभवति। भारत-ईरानीभाषा भारोपीयपरिवारस्य सतं वर्गे विद्यमानासु भाषासु अन्यतमा श्रेष्ठा भाषा भवति। केचित् विद्वांसः इमां हिन्द-ईरानी शाखापि वदन्ति। अस्याः शाखायाः भाषाः वदन्तः जनाः आर्याः आसन्।

भारतीयसंस्कृतौ साहित्ये च आयर्शब्दस्य महत्वं स्वयंसिद्धम्। ईरानेति शब्दोऽपि 'आर्याणां' शव्दस्यैव विकसितं रूपं भवति। भारते ईराने च जनैः कथिततत्वेन भारोपीयपरिवारस्य अस्याः शाखायाः नामकरणं आर्यः भारत-ईरानी वा भवति। यथान्यभाषापरिवारेभ्यः भारोपीयपरिवारस्य महत्वं स्वतन्त्रं भवति, तथा भारोपीयपरिवारस्य अन्यासु शाखासु आर्यः भारत-ईरानी वा शाखायाः महत्वं सर्वाधिकं भवति। वस्तुतः आर्यशाखया एव विश्वस्य भाषापरिवारेषु भारोपीयपरिवारः भाषाविज्ञानदृष्ट्या उद्भासितो भवति।

भाषाविज्ञानविदः आर्यशाखायाः विशेषत्वानि स्वीकुर्वन्ति। भारोपीयपरिवारस्य प्राचीनतमं प्रमाणिकं साहित्यं 'ऋग्वेदः' अवेस्ता चेत्यस्यां शाखायां वर्त्तते। विश्वस्य कास्याञ्चिदपि भाषायां ऋगवेद इव प्राचीनं प्रामाणिकञ्च साहित्यं नोपलभ्यते। ऋगवेदस्य ऋचां रचनाकालः विविधैः विद्वद्भिः 3000 इ.पू.-1000 इ.पू. यावत् स्वीकृतः। अवेस्ता

धर्मग्रन्थस्यापि समयः इ.पू. 3000 इ.पूर्वतः 1000 इ.पूं. यावत् इति स्वीकृतः। आर्यशाखायाः भाषाणां संरचना साहित्यमपि महत्वपूर्णं भवति। भाषाविज्ञानस्य अध्ययनार्थं सर्वाधिकाः विषयाः आर्यशाखायां प्राप्यन्ते। भाषाविज्ञाने अध्येतुं संस्कृतमेव वलिष्ठमाध्यमः भवति। पाश्चात्यविदुषा Whitney महोदयैः तस्य 'Language and its Study' पुस्तके उल्लखितं यत् –

"As historical fact, the scientific study of human speech is founded upon the comparative philology of the Indo-European Languages and this acknowledges the Sanskrit as its most valuable means and aid."

आर्यः भारत-ईरानी वा शाखायाः जनाः स्वयं आर्याः इति कथ्यन्ते। अतोऽस्याः शाखायाः भाषाऽपि आर्यः भवति। अस्याः शाखायाः द्वे उपशाखे स्तः यथा- १. भारतीयः २. ईरानी। प्राचीनकालतः आधुनिककालं यावत् सर्वाः भारतीयाः भाषाः आस्यामुपशाखायां वर्त्तन्ते। भाषेयं कालस्याधारेण त्रिविधा विभज्यते। यथा –

१. प्राचीनभारतीयार्यभाषा। (1500 इ.पू. – 500 इ.पू.)

२. मध्यकालीनभारतीयार्यभाषा। (500 इ.पू. – 1000 ख्री.)

३. आधुनिकभारतीयार्यभाषा। (1000 ख्री. – अद्ययावत्)

## १. प्राचीनभारतीयार्यभाषा। (1500 इ.पू. - 500 इ.पू.)

प्राचीनभारतीयार्यभाषायाः समयः 1500 इ.पू. – 500 इ.पू. मध्ये स्वीकृतः। अस्मिन् समये वैदिकसंस्कृतं लौकिकसंस्कृतञ्च च विकसिता अभवताम्। वेदस्य संहिताः ब्राह्मणानि आरण्यकानि उपनिषदः इत्यादीनि वैदिकसाहित्यानि तथा रामायणं महाभारतं संस्कृतकाव्यानि नाटकानि च लौकिकसंस्कृतसाहित्यानि अत्रोपलभ्यन्ते।

## २. मध्यकालीनभारतीयार्यभाषा। (500 इ.पू. - 1000 ख्री.)

अस्याः समयः 500 इ.पू. – 1000 ख्री. मध्ये स्वीकृतः। अस्मिन् समये भारतवर्षे प्राकृतभाषा विकसिता अभवत्। प्राचीनप्राकृतभाषा, प्राकृतभाषातः अपभ्रंशश्चेति क्रमेण विकसिता अभवत्।

## ३. आधुनिकभारतीयार्यभाषा। (1000 ख्री. - अद्ययावत्)

अस्याः समयः 1000 ख्रीष्ट्रीयात् अद्ययावत् स्वीकृतः। आधुनिकार्यभाषाः अपभ्रंशभाषातः समुत्पन्नाः भवन्ति। भौगोलिकदृष्ट्या आधुनिकभाषाणां वर्गीकरणं निम्नोक्तदिशा भवति।

क. उत्तरी वर्गः। (कश्मिरी, लहँदा, सिन्धी, पञ्जावी)

ख. पश्चिमी वर्गः। (राजस्थानी, गुजुराती)

ग. मध्य वर्गः। (पश्चिमी हिन्दी, पूर्वी हिन्दी, पहाड़ी)

घ. पूर्वी वर्गः। (बिहारी, असमी, बङ्गाली, ओड़िया)

ङ. दक्षिणवर्गः। (मराठी, सिंहली)

**(ख) ईरानी :-**

ईरानदेशे कथिताः सर्वाः भाषाः अस्यामुपशाखायाः भवन्ति। भारतीयोपशाखा इव इयमपि कालाधारेण त्रिविधा विभज्यते। यथा -१. प्राचनेरानी, २. मध्येरानी, ३. आधुनिकेरानी इति। अस्या उपशाखायाः प्राचीनग्रन्थः 'अवेस्ता' भवति। अस्यैवाधारेण प्राचीनेरानी भाषापि अवेस्ता कथ्यते। ईरानस्य पश्चिमभागे कथिता ईरानीभाषा फारसी इति कथ्यते। फारसीभाषायाः विकसितं रूपं मध्यकालीनफारसी, पहलवी, आधुनिकफारसी च रूपे प्रतिष्ठिता भवति। फिरदौसीकवेः 'शाहनामा' आधुनिकफारसीभाषायाः प्रसिद्धरचना भवति।

## 1.2. वैदिकसंस्कृतस्य सामान्यः परिचयः

भारतीयार्यभाषासु वैदिकसंस्कृतभाषा प्राचीनतमा भवति। अस्याः समयः 1500 ई. पूर्वतः 500 इ. पूं. यावत् विद्वद्भिः स्वीकृतः। परन्तु समयोऽयं विवादास्पदः। वैदिकसंस्कृतं वैदिकभाषा, वैदिकी, छान्दस्, प्राचीनसंस्कृतमपि कथितं भवति। अस्याः भाषायाः प्राचीनतमं रूपं ऋग्वेदे सुरक्षितं वर्त्तते। सर्वाः संहिताः ब्राह्मणाः आरण्यकानि, उपनिषदः, वेदाङ्गानि च एते सर्वे ग्रन्थाः वैदिकसंस्कृतभाषया एव रचिताः । परन्तु वैदिकसंस्कृतस्य प्राचीनतमं रूपं ऋग्वेदे परिलक्षितं

भवति। ऋगवेदस्य दशसु मण्डलेषु द्वितीयमण्डलादारभ्य नवममण्डलं यावत् मण्डलानि सर्वाधिकानि प्राचीनानि भवन्ति। इदं वंशानुमण्डलमपि कथ्यते। प्रथममण्डलं दशममण्डलञ्च अर्वाचीना रचना भवति। अन्ये ग्रन्थाः अपि अर्वाचीनाः भवन्ति। विदुषां मतानुसारेण वैदिकभाषायाः अधुना यत् साहित्यमुपलभ्यते तत् तात्कालिकी साहित्यिकी भाषा आसीत्। कथिता भाषा नासीत्।

## 1.2.1 वैदिकभाषायाः ध्वनयः

मूलभारोपीयभाषातः विकसिता अपि वैदिकभाषायाः ध्वनयः मूलभारोपीयभाषातः बहुशः भिन्नाः भवन्ति। यथा :-

1. मूलभारोपीयभाषायाः 'अँ', 'एँ', 'ओँ' त्रयाणां मूलस्वराणां स्थाने वैदिकभाषायां 'अ' स्वर एव विद्यते।

2. मूलभारोपीयभाषायाः 'आ', 'ऐ', 'औ' इति दीर्घस्वराणां स्थाने वैदिकभाषायां 'आ' इति दीर्घस्वरः अवशिष्यते।

3. मूलभारोपीयभाषायां स्थितयोः 'न्', 'म्' अन्तस्थयोः ध्वनयोः वैदिकभाषायां लोपो भवति।

4. मूलभारोपीयभाषायां 'क' वर्ग ध्वनयः त्रिविधाः आसन् :-

   **क.** कण्ठतालव्यः (क्य्, ख्य्, ग्य्, घ्य्)

   **ख.** कठ्योष्ठ्यः। (क्व्, ख्व्, ग्व्, घ्व्)

**ग.** शुद्धकण्ठः । (क्, ख्, ग्, घ्)

परन्तु वैदिकभाषायां क वर्गस्य ध्वनयः शुद्धकण्ठ्य (क्, ख्, ग्, घ्) रूपेणैव आसन्।

5. मूलभारोपीयभाषायां चटवर्गयोः अभावः आसीत्। परन्तु वैदिकसंस्कृते चटौ वर्गौ उपलभ्येते। मूर्धन्य 'ट' वर्ग ध्वनीनामुपस्थितिना वैदिकसंस्कृतस्य महत्वं दृश्यते, यतः वैदिकभाषायां द्राबिड़भाषाणां प्रभावः विद्यते।

6. मूलभारोपीयभाषायां एकैवोष्म 'स्' ध्वनिः आसीत्। परन्तु वैदिकसंस्कृते सोष्मध्वनिना सह श, ष इति ध्वनीनामुपस्थित्यां उष्मध्वनयः श्, ष्, स्, आसन्।

**वैदिक संस्कृतस्य ध्वनयः द्वापञ्चाशत् (52) आसन् ते यथा:-**

मूलस्वराः - अ, आ, इ, ई, उ, ऊ, ऋ, ॠ, लृ, ए, ओ।

संयुक्तस्वराः - ऐ, औ।

कष्ठ्यः - क्, ख्, ग्, घ्, ङ् (क - वर्गः)।

तालव्यः - च्, छ्, ज्, झ्, ञ् (च - वर्गः)।

मूर्धन्यः - ट्, ठ्, ड्, ढ, ण् (ट - वर्गः)।

दन्त्यः - त्, थ्, द्, ध्, न् (त - वर्गः)।

औष्ठ्यः - प्, फ्, ब्, भ्, म् (प - वर्गः)।

दन्तोष्ठ्यः - ब्।

अन्तस्थाः - य्, र्, ल् , व्

शुद्धानुनासिकः - अनुस्वारं (॰)

उपध्मानीयः - प्, फ् पूर्वस्य अर्द्धविसर्गसदृशः।

जिह्वामूलीयः - क्, ख् पूर्वस्य अर्द्धविसर्गसदृशः।

उष्मः - श्, ष्, स्, ह्।

## 1.2.2 वैदिकभाषायाः वैशिष्ट्यम्

वैदिकभाषायाः कानिचन वैशिष्ट्यानि निम्नोक्तदिशा प्रतिपद्यन्ते।

1. वैदिकभाषायां स्वराणामुच्चारणं ह्रस्वदीर्घाभ्यां साकं प्लुतस्यापि भवति। यथा :- आसी३त्, विन्वती ३, इत्यादयः।
2. वैदिकभाषायां 'लृ' वर्णस्य बहुलं वर्णनं दृश्यते।
3. वैदिकभाषायां संगीतात्मकस्य स्वराधातस्य महत्त्वं भृशं दृश्यते। अस्याः त्रयः स्वराः सन्ति। उदात्तम् अनुदात्तं, स्वरितञ्च। वैदिकमन्त्रााणामुच्चारणकाले उदात्तादीनां स्वराणामुच्चारणमनिवार्यं भवति, यतः स्वराणां परिवर्त्तनेन शब्दे अर्थस्यापि परिवर्त्तनं भवति। इन्द्रशत्रुर्वर्धस्व अस्य प्रसिद्धमुदाहरणं भवति। भाषाविज्ञानदृष्ट्या अपि वैदिकभाषायाः स्वराघातस्य प्राधान्यं वर्त्तते।
4. प्राचीनवैदिकभाषायां 'ल्' वर्णस्य स्थाने 'र्' वर्णस्य प्रयोगः दृश्यते।

यथा :- सलिलं > सरीरं।

5. वैदिकभाषायाः व्यञ्जनवर्णेषु ळ, ळह्, इति वर्णौ स्तः, यौ वर्णौ अन्याभ्यः भाषाभ्यः वैदिकसंस्कृतं पृथक् कुरुतः। यथा :-

१. इळा।

२. अग्निमीळे।

6. वैदिकभाषायां सन्धिनियमाः स्वतन्त्राः भवन्ति। उपसर्गाः धातोः परे पूर्वेऽपि प्रयुक्ताः भवन्ति[1]। पुनश्च व्यवधाने सति उपसर्गाः धातोः परे पूर्वेऽपि प्रयुक्ताः भवन्ति[2]। सन्धियोग्यस्थले सन्धि न भवति। कुत्रचित् द्वयोर्मध्ये सन्धिर्भवति। यथा :-

'तितउ' (अ + उ) तितौ न भवति।

'गोओप' ओ + ओ सन्धि भवति।

7. वैदिकभाषायां शब्दरूपेषु विभक्तौ वचने च बहुरूपत्वं परिलक्ष्यते। उदाहरणं :-

'अ' कारान्तस्य शब्दस्य प्रथमाविभक्तेः द्विवचने देवा देवौ इति रूपद्वयं दृश्यते। प्रथमाविभक्तेः बहुवचने च जनाः, जनासः उति रुपद्वयं[3] तथा तृतीयविभक्तेः बहुवचने देवैः देवेभिः इति रुपद्वयं परिदृश्यते।

8. वैदिकभाषायां शब्दरूपवत् धातुरूपेष्वपि रूपाधिक्यं लक्ष्यते। यथाः 'कृ' धातोः लट्-लकारस्य प्रथमपुरुषे कृणोति, कृणुते, कुरुते, करोति, इति नैकानि रूपाणि दृश्यन्ते।

9. धातुभिः साकं एकस्मिन्नेव अर्थे बहवः प्रत्ययाः दृश्यन्ते।

यथा :- 'तुमन्' प्रत्ययस्य अर्थे तुमुना सह से, सेन, असे, असेन्, कसे, कसेन, अध्यै, अध्यैन्, कध्यै, कध्यैन्, शध्यै, शध्यैन्, तवै, तवैङ्, तवेन च इति षोड़शाः प्रत्ययाः उपलभ्यन्ते[4]।

10. वैदिकभाषायामुपसर्गाणां प्रयोगः स्वातन्त्रेण अभवत्। उदाहरणं - अभि त्वा पूर्वपीतये सृजामि (ऋ.वे.1/19/9) अत्र अभि उपसर्गस्य सृजामि क्रियया साकं स्वातन्त्रेण भवति। तथैव मानुषान् अभि (ऋ.वे.1/48/7) अत्र अभि स्वतन्त्रेण प्रयुक्तो भवति।

11. वैदिकभाषायां पदरचनादृष्ट्या भाषेयं श्लिष्टयोगात्मिका भवति। सम्बन्धतत्त्वेन सह (प्रत्ययस्य) अर्थतत्त्वस्य (प्रकृतेः) यद्यपि किञ्चित् परिवर्त्तनं भवति, परन्तु अर्थतत्वप्रकृतितत्त्वयोः पृथकत्वम् अवलोक्यते। यथा - गृहाणाम्, अत्र गृहं प्रकृतिः, नाम प्रत्ययश्च भवति, फलतः एतयोः रूपं स्पष्टं भवति।

# UNIT - II लौकिकसंस्कृतम् /Classical Sanskrit

## 2.1 लौकिकसंस्कृतस्य सामान्य परिचय :

प्राचीनभारतीयार्यभाषायाः द्वितीयं रूपं संस्कृतं भवति। इदमेव लौकिकसंस्कृतं क्लासिकालसंस्कृतं इत्यपि कथ्यते। युरोपे लैटिन भाषायाः यथोच्चस्थानं वर्त्तते, तथैव भारतवर्षे संस्कृतभाषायाः भवति। भारतवर्षे यद्यपि बहुप्राचीनकालतः संस्कृतस्य व्यवहारः आसीत्, परन्तु परवर्त्तिसमये महर्षेः पाणिनेः व्याकरणनियमानुसारेण रामायणादारभ्य अद्ययावत् यानि काव्यानि रचितानि तान्येव लैकिकसंस्कृतस्य रूपं भवति। लौकिकसंस्कृतं सुनिर्मलं, सुपवित्रं व्यापकञ्च भवति। भारतवर्षे गुप्तयुगे संस्कृतस्य सुवर्णयुग आसीदिति ऐतिहासिकाः वदन्ति। युगेऽस्मिन् कालिदासादयः कवीश्वराः स्वलेखन्या लौकिकसंस्कृतं समृद्धं कृतवन्तः। विश्वस्य समृद्धतमेषु साहित्येषु लौकिकसंस्कृतस्य साहित्यं गौरवपूर्णं भवति। ये केचित् कवीश्वराः स्वप्रतिभाबलेन संस्कृतसाहित्यं समृद्धं कृतवन्तः। तेषां कविवराणां सकृतिनामानि निम्नोक्तदिशा प्रतिपाद्यन्ते –

| **महाकवयः** | | **कृतयः** |
|---|---|---|
| आदिकविः वाल्मीकिः | > | रामायणम्। |
| महामुनिः व्यासदेवः | > | महाभारतम्। |
| महाकविः कालिदासः | > | रघुवंशम्। |

| | | |
|---|---|---|
| | | कुमारसंभवम्। |
| | | मेघदूतम्। |
| | | ऋतुसंहारम्। |
| | | अभिज्ञानशाकुन्तलम्। |
| | | मालविकाग्निमित्रम्। |
| | | विक्रमोर्वशीयम्। |
| अश्वघोषः | > | वुद्धचरितम्। |
| महाकविर्भारविः | > | किराताज्र्जुनीयम्। |
| महाकविर्माघः | > | शिशुपालवधम्। |
| श्रीहर्षः | > | नैषधीयचरितम्। |

भाषाविज्ञानदृष्टया लौकिकसंस्कृतस्य महत्त्वं सर्वाधिकं भवति। संस्कृतस्य अध्ययनादेव युरोपे आधुनिकयुगे तुलनात्मकभाषाविज्ञानस्य प्रारम्भो भवति। लौकिकसंस्कृतस्य विकासः उत्तरभारते प्रचलितात् वैदिकभाषातः मन्यते। प्रायतः इ.पू. अष्टमशतकात् साहित्ये अस्य प्रयोगोऽभवत्। परन्तु ख्री॰ चतुर्थ पञ्चमशतकयोः महर्षिणा पणिनिना व्याकरणस्य नियमान्नाधारीकृत्य अष्टाध्यायीग्रन्थः विरचितः। तस्मात् व्याकरणनियमैः वद्धं साहित्यं लौकिकसाहित्यं समृद्धं कृतवान्।

## 2.1.2. लौकिकसंस्कृतस्य ध्वनयः

लौकिकसंस्कृतस्य ध्वनयः यद्यपि वैदिकसंस्कृतभाषेव आसन्, परन्तु ध्वनिषु केचित् लौकिकसंस्कृते न्यूना अभवन्। वैदिकभाषायां द्विपञ्चाशत् (52) ध्वनयः आसन्। परन्तु लौकिकसंस्कृते अष्टचत्वारिंशत् (48) ध्वनयः अभवन्। वैदिकभाषायाः ळ, ळह, जिह्वामूलीयः उपध्नानीयः इति चत्वारः ध्वनयः लुप्ताः अभवन्।

एतद् विहाय ध्वनीनामुच्चारणे परिवर्त्तनमपि उपलभ्यते। यथा -

1. वैदिकसंस्कृते ॠ, ॠc, लृ एते त्रयः वर्णाः स्वराः आसन्। परन्तु संस्कृतभाषायां ॠ, ॠc, लृ इति वर्णानां स्वरवर्णत्वं नाशो भवति। तथा च तेषामुच्चारणं 'र्' 'ल्' व्यञ्जनवर्ण इव भवति।

2. लौकिकसंस्कृते दन्तोष्ठय 'ब' वर्णस्योच्चारणमपि अन्तस्थ 'व' वर्णस्येव अभवत्। वैदिकभाषायां ब वर्णस्य प्रयोगः दन्तोष्ठ्यान्तस्थरूपाभ्यामभवत्।

3. वैदिकभाषायाः शुद्धोऽनुस्वारः ध्वनिरपि संस्कृतभाषायामनुनासिकोऽभवत्।

4. वैदिकभाषायां ऐ, औ वर्णौ संयुक्तौ स्वरौ इव व्यवहरतः। परन्तु संस्कृतभाषायां ऐ, औ वर्णौ संयुक्तस्वर इव उच्चारणं विहाय, मूलस्वर इव भवति।

## 2.1.3 संस्कृतभाषायाः वैशिष्ट्यम् :

लौकिकसंस्कृतस्य प्रमुखविशेषत्वं भवति महर्षेः पाणिनेः व्याकरणनियमबद्धत्वम्। वैदिकसंस्कृतादनेन विशेषत्त्वेन लौकिकसंस्कृतं पृथक् भवति। वैदिकसंस्कृते भाषायाः कृते कश्चित् नियमः नासीत्। शब्दरूपाणां धातुरूपाणाञ्च बहुरूपतामासीत्। सन्धिनियमाः शिथिलाः अभवन्। एकस्मिन्नर्थे विविधानां प्रत्ययानां प्रयोगोऽभवत्। परन्तु संस्कृतभाषायां महर्षेः पाणिनेः अष्टाध्यायीग्रन्थस्य नियमानुसारं भाषा नियन्त्रिता अभवत्। सर्वे कवयः व्याकरणसूत्राण्याधारीकृत्य काव्यानि रचितवन्तः। अतः संस्कृतभाषायाः वैशिष्ट्यानि उल्लिखितानि यथा –

1. वैदिकभाषायां प्रयुक्ताः ळ, ळह, जिह्वामूलीयः, उपध्मानीयः इति चत्वारः ध्वनयः संस्कृतभाषायां नासन्।

2. महर्षिपाणिनिकृतव्याकरणसूत्रैः शब्दरूपेषु धातुरूपेषु चैकरूपत्वमभवत्।

3. संस्कृतभाषायां लेट्लकारस्य प्रयोगः समाप्तोऽभवत्।

4. एकस्मिन्नर्थे-बहुप्रत्ययानां व्यवहारः नाशोऽभवत्। अत्र केवलं एकस्य प्रत्ययस्य एकस्यैवार्थे प्रयोगोऽभवत्। यथा :- तुमुन्, क्त्वा, इत्यादयः प्रत्ययाः।

5. संस्कृतभाषायां कालक्रमेण नैकानां वैदिकशब्दानां प्रयोगः लुप्तोऽभवत्। यथा :-

| | |
|---|---|
| दर्शतः (सुन्दरः) | ऋदुदरः (दयालुः) |
| दृशीकः (सुन्दरः) | अवन्तु (रात्रिः) |
| रपस (दुर्वलत्वं) | अमीवा (व्याधिः) |
| अमूर (वुद्धिमान्) | मूरः (मूढः) |

6. नैकानां वैदिकशव्दानां संस्कृतभाषायां भिन्नार्थे प्रयोगः भवति। यथा

| **शव्दाः** | | **वैदिकार्थः** | **संस्कृतार्थः** |
|---|---|---|---|
| १. अरातिः | > | शत्रुता | शत्रुः |
| २. अरिः | > | ईश्वरः, धार्मिक, शत्रु | शत्रुः |
| ३. न | > | उपमावाचक (यथा) निषेधवाचक (नास्ति) | निषेधवाचक वाचक |
| ४. मृळीकः | > | कृपा | शिवस्य अन्यनाम |
| ५. क्षितिः | > | गृहं, निवासस्थली, नगरं, मनुष्यः | पृथ्वी |
| ६. बधः | > | भयङ्कर, शस्त्रम् | वधः |

7. संस्कृतभाषायां सन्धिनियमाः कठोराः आसन्। फलतः सन्धिनियमानुसारेण शब्दानां प्रयोगो भवति।

8. उपसर्गाः केवलं धातोः पूर्वे एव प्रयोगाः भवन्ति। न परे, व्यवधाने अपि भवन्ति।

9. स्वरेषु ‘लृ’ स्वरस्य लोपोऽभवत्। उदात्तानुदात्तस्वरितेत्युच्चारणं लुप्तमभवत्।

10. स्वरभक्तिः प्रचलितः न भवति।

एवं प्रकारेण वैदिकभाषायाः लौकिकसंस्कृतं परिमार्जित सुव्यवस्थितञ्च भवति।

## 2.1.4. वैदिकसंस्कृतलौकिकसंस्कृतयोर्मध्ये साम्यं बैषम्यञ्च :

1. उभे भाषे श्लिष्ट्योगात्मक्यौ भवतः।
2. उभयोः भाषयोः प्रयुक्तेषु शब्देषु धातूनामर्थः प्रायतः सुरक्षितो भवति।
3. उभयोः भाषयोः त्रिणि लिङ्गानि त्रिणि वचनानि च वर्त्तन्ते।
4. उभयोः भाषयोः वाक्येषु शब्दानां स्थानं निश्चितं न भवति।
5. उभयोः भाषयोः षट्कारणानि! कर्त्तृ - कर्म - करण - सम्प्रदान - अपादान - अधिकरणञ्च तथा सप्तविभक्तयः यथा :- प्रथमा - द्वितीया - तृतीया - चतुर्थी - पञ्चमी - षष्ठी - सप्तमी भवन्ति।

## 3.1 अवेस्ता (Avesta) :

भारोपीयपरिवारस्य सतं वर्गस्य इंडो-ईरानीशाखाया एका उपशाखा ईरानी शाखा भवति। अस्याः शाखायाः क्षेत्रं ईरानदेशो भवति। अवेस्ता अस्याः भाषा भवति, या भाषा वैदिक संस्कृतमिव बहुप्राचीना भवति।

भारतीयभाषा इव ईरान्यार्यभाषायाः अवेस्तायाः प्राचीनता सर्वमान्या भवति। कालदृष्ट्या इयं त्रिविधा भवति।

1. प्राचीनेरानी :-
2. मध्यकालीनेरानी :-
3. आधुनिकेरानी :-

**1. प्राचीनेरानी :-**

प्राचीनेरान्याः अवेस्तायां साहित्यं समृद्धमासीत्। परन्तु द्वाभ्यां विदेश्याक्रमणाभ्यां अस्याः समृद्ध साहित्यं नष्टं जातम्। 323 ई. पूर्वे सिकन्दरेण आक्रमणं कृतम्। तथा 7 ई. पूर्वे आरवाणां आक्रमणेन अस्याः साहित्यं नष्टमभवत्। प्राचीनेरानीभाषायाः रूपद्वयं वर्त्तते।

१. ईरानस्य पूर्वभागे कथिता भाषा।

२. पश्चिमभागे कथिता भाषा।

**१. ईरानस्य पूर्वभागे कथिता भाषा :-**

अस्याः साहित्यं अवेस्ता ग्रन्थो भवति। ग्रन्थोऽयं पार्सीयानां धर्मग्रन्थो भवति। अस्याः रचयिता जरथुष्ट्रः भवति। अस्याः भाषा अपि अवेस्ता इति कथ्यते। केचिदिमां अवेस्ती, अवेस्तन् प्राचीन वैक्ट्रियन् अपि कथयन्ति । भ्रमवशतः केचिदिमां जेन्दावेस्ता वदन्ति। वस्तुतः जिन्द शव्दास्यार्थ टीका भवति। अतः जिन्दावेस्तायाः अर्थो भवति अवेस्तायाः टीका या पहलवीभाषायाम् अस्ति। वस्तुतः अवेस्ता शव्दस्यार्थं भवति शास्त्र। अस्यां भाषायां वैदिकग्रन्थस्य ऋगवेदस्य मन्त्रा इव गाथाः सन्ति। अस्याः प्राचीनांशः इ.पू. 3000 पूर्वतः 700 इ.पू. यावत् मन्यते। अतः ऋग्वेदेन साकं अवेस्ताग्रन्थस्य तुलना अस्याः विशेषत्वं प्रदर्शयति। अवेस्ताधर्मग्रन्थस्य भाषायां पूर्वीईरान्याः अवेस्तायाः वा विकासः केनरूपेण अभवत्, तत् कोऽपि न जानाति।

## 3.1.2 वैदिकसंस्कृतावेस्तयोर्मध्ये साम्यं वैषम्यञ्च :

भारतीयोपशाखायाः प्राचीनतमा भाषा वैदिकसंस्कृतभाषा भवति। तथैव ईरान्युपशाखायाः प्राचीनतमा भाषा अवेस्ता अस्ति। उभयोः वैदिकावेस्तयोर्मध्ये साम्यं किञ्चित् वैषम्यपि परिलक्ष्यते। उभयोः विकासः मूलभारोपीयभाषायाः भवति। वैदिकावेस्तयोः साम्यं वैषम्यञ्च आधारीकृत्य अवेस्तायाः वैशिष्टयं स्पष्टं भवति। अतः उक्तं थोमास् वुरो महोदयैः यथा :-

१. मूलभारोपीयभाषायाः ह्स्वाः (अँ, एँ, ओँ), दीर्घस्वराः (आ, ऐ, औ) इति मूलस्वराणां स्थाने अवेस्तायां वैदिकसंस्कृते च एकह्रस्वः एकश्च दीर्घस्वरः दृश्यते।

| **मू. भा.** | | **अबैस्ता** | | **वैदिकसंस्कृतं** |
|---|---|---|---|---|
| नेभोस | > | नवह | > | नभस् |
| ओस्थ | > | अस्त | > | अस्थि |
| यागः | > | यज् | > | यज् |
| एपो | > | अप | > | अपः |

२. मूलभारोपीयभाषायाः अतिह्रस्वस्वरस्य स्थाने अवेस्तायां वैदिकसंस्कृते च ‘इ’ दृश्यते।

३. मूलभारोपीयभाषायाः ‘र्’ (ऋ) वर्णस्य स्थाने अवेस्तायां ‘ल्’ (लृ) तथा ‘ल’ (लृ) वर्णस्य स्थाने ‘र्’ (ऋ) उपलभ्यते।

४. मूलभारोपीयभाषायाः शब्देषु र्, उ्, क्, र्, इति वर्णानां परे स्थितस्य ‘स’ व्यञ्जनस्य अवेस्तायां श् भवति। यथा :-

| **मू. भा.** | **अवैस्ता** | **वैदिकसंस्कृतं** |
|---|---|---|
| स्थिस्थामि | > हिश्तइति > | तिष्ठामि |
| जिउस्तर | > जओशा > | जोष्टा |

५. मूलभारोपीयभाषायाः कण्ठ्यवर्णाः कण्ठयोष्ठाश्च क् (क्व), ख (ख्व), ग् (ग्व), घ (घ्व) ध्वनयः अवेस्तायां शुद्धकण्ठाः (क्, ख्, ग्, घ्,) भवन्ति। परे ई, ए, स्वरयोः आगते एते क्, ख्, ग्, घ्, कण्ठाः स्वराः क्रमे च्, छ्, ज्, झ्, वर्णाः भवन्ति।

६. मूलभारोपीयभाषायाः कण्ठतालव्याः क् (क्य) ख् (ख्यः), ग् (ग्य), घ (घ्य) ध्वनयः अवेस्तायां यथाक्रमेण श्ह, ज्ह वर्णेषु रूपान्तरिताः भवन्ति। कालान्तरे अवेस्तायां स, ज, ज्ह, वर्णाः भवन्ति। संस्कृते च श, ज, ह वर्णाः भवन्ति।

७. अवेस्तायां स्वरान्तानां शब्दानां षष्ठी बहुवचने ‘नाम्’ प्रत्ययस्य संयोगो भवति। यथा : आर्याणाम्।

८. अवेस्तायां आज्ञार्थकः प्रत्ययः एकवचने ‘तु’, बहुवचने च ‘न्तु’ भवति।

९. नैकाः शब्दाः भारतईरानी उभयोः भाषायोः ध्वनयः अर्थ दृष्ट्या प्रायतः समानाः भवन्ति।

| **वैदिकसंस्कृत** | > | **अवेस्ता** |
|---|---|---|
| ओजस् | > | आजो। |
| अनु | > | अनु। |
| अन्यः | > | अन्य। |
| ददामि | > | ददामि। |
| पुत्रः | > | पुथ्रः। |

१०.वैदिकसंस्कृतेन सह साम्याधिक्यात् सामान्यपरिवर्तनेन वाक्यं भवति।

| **वैदिकसंस्कृतम्** | > | **अवेस्ता** |
|---|---|---|
| यो यथा पुत्रं तरुणं सोमं। | > | यो यथा पुत्रं तउरुनम् हओमम्। |
| वन्दते मर्त्यः। | > | वन्द ऐता मश्यो। |

**वैदिकावेस्तयोर्मध्ये वैषम्यम् :-**

मूलभारोपीयभाषातः विकसितत्वात् उभयोः भाषयोर्मध्ये वैषम्यानि परिलक्षितानि भवन्ति।

1. वैदिकसंस्कृतस्य ‘ऋ’ वर्णः अवेस्तायां ‘अर्’, ‘र्’, ‘अ’ च उपलभ्यते

| **वैदिकसंस्कृतम्** | > | **अवेस्ता** |
|---|---|---|
| वृक्षाम् | > | वरेणम्। |

2. वैदिकसंस्कृतभाषायां ‘ट’ वर्गः अस्ति। परन्तु अवेस्तायां नास्ति।

3. वैदिकसंस्कृतभाषायां ‘च’ वर्गस्य पञ्चवर्णाः सन्ति। (च, छ, ज, झ, ञ) परन्तु अवेस्तायां चवर्गे च, ज, वर्णद्वयमेव विद्यते।

4. वैदिकसंस्कृतस्य वर्णमालायां पञ्चवर्गेषु विद्यमानाः महाप्राणवर्णाः (द्वितीय, चतुर्थः) अवेस्तायां न सन्ति ।

5. प्राचीनावेस्तायां ‘ल’ स्थाने, ‘र्’ वर्णस्य प्रयोगो भवति।

   यथा :- श्रीलः > स्त्रीरो।

6. अवेस्ताभाषायां स्वराणां संख्या वैदिकादधिकाः भवति। यत वैदिकस्य अ, आ इति स्थानयोः भिन्नस्वराणां प्रयोगोऽस्ति।

7. वैदिकसंस्कृतस्य ‘स’ ध्वनिः अवेस्तायां ‘ह्’ भवति यथा :-

| **वैदिकसंस्कृतम्** | > | **अवेस्ता** |
|---|---|---|
| सप्तः | > | हप्तः। |
| असि | > | अहि। |
| असुरः | > | अहुरः। |

8. वैदिकसंस्कृतस्य घोषमहाप्राणाः घ, ध, भ अवेस्तायां घोषाल्पप्राणाः भवन्ति।

| **वैदिकसंस्कृत** | > | **अवेस्ता** |
|---|---|---|
| भूमि | > | बुमि। |

| | | |
|---|---|---|
| भ्राता | > | ब्राता। |
| दीर्घम् | > | दरेगम्। |

9. वैदिकसंस्कृतस्य अघोषाल्पप्राणाः ‘क्’, ‘त्’, ‘प्’ ध्वनय अवेस्तायां सघोषाः ‘ख’, ‘थ’, ‘फ’ वर्णाः भवन्ति।

| **वैदिकसंस्कृतम्** | > | **अवेस्ता** |
|---|---|---|
| क्रतुः | > | खुरतुश। |
| सत्यम् | > | हरथ्यम्। |
| स्वप्नम् | > | हबफनम्। |

10. अवेस्तायामादिस्वरागमः अपनिहितश्च संस्कृतादिधको भवति।

| **वैदिकसंस्कृतम्** | > | **अवेस्ता** |
|---|---|---|
| भरति | - | वरइति। |
| भवति | - | ववइति। |

### 3.1.3. पश्चिमीरानी प्राचीनफारसी वा :

ईरानस्य पश्चिमीभागे कथितत्वात् इयं भाषा पश्चिमी ईरानी इति कथ्यते । इयं प्राचीनफारसी अपि कथ्यते। भारतीयप्राचीनसंस्कृतेन सह अवेस्तायाः साम्यं परिलक्ष्यते। लिखितरूपेण भाषेयं एकेमिनियम् राज्ञः हेरियन् प्रथमेन (521 - 485 इ.पू.) उर्णेष्वभिलेखेषु उपलभ्यते।

अभिलेखेषु उत्कीर्णानां 400 शव्दान्नाधारीकृत्य अस्याः विशेषत्वं ज्ञायते।

1. ‘प्राचीनफारसी’ अवेस्ताभाषायाञ्च नैकाः समस्याः सन्ति।
2. प्राचीनफारसी भाषायाः वर्णमालाः अवेस्तापेक्षया सरला भवति।
3. वर्णमालादृष्ट्या प्राचीनफारसी संस्कृतस्य निकटवर्त्तिनी भवति। वस्तुतः प्राचीनेरान्याः रूपद्वयमासीत्।

   ईरानस्य पूवीभागे कथिता भाषा अवेस्तायामुपलभ्यते। अस्याः विकासः नोपलभ्यते।

ईरानी

पूर्वी (अवेस्ता) पश्चिमी (प्राचीन फारसी)

मध्यकालीनरूपं (अनुपलव्ध)

मध्यकालीनफारसी (पहलवी)

आधुनिकरूपं (अनुपलब्धम्)

आधुनिकफारसी (साहित्यिकफारसी)

# UNIT - IV पालिः प्राकृतम् च/Pali and Prakit

## 4.1. पालि एवं प्राकृतम् :

मध्यकालीनासु भारतीयार्यभाषासु भारतीयार्यभाषासु प्राकृतभाषान्यतमा। मध्यकालीनभारतीयार्यभाषाणां कालः 500 इ. पूर्वतः 1000 ख्रीष्टीयं यावत् मन्यते। समयेऽस्मिन् या भाषाः भारते प्रचलिताः आसन् ताः प्राकृतभाषा इति कथ्यन्ते। महार्षिणा पाणिनिना व्याकरणनियमैः या भाषा विकसिताः तदतिरिक्ता या भाषा कथितभाषात्वेन व्यवहृता अभवत्, ताः प्राकृतभाषाः भवन्ति। भाषेयं त्रिभिः भागैः विभक्ता भवति। यथा :-

1. प्रथमं प्राकृतं ।(500 इ. पूर्वतः ख्रीष्टीयं प्रारम्भं यावत्)
2. द्वितीयं प्राकृतं। (ख्री. 500 यावत्)
3. तृतीयं प्राकृतं। (500 इ. पूर्वतः ख्रीष्ट्रीयं प्रारम्भं यावत्)

प्रथमप्राकृतस्य रूपद्वयं आसीत्।

(क) पालिः (ख) अभिलेखशिलालेखी

## 4.2. पालेः उत्पत्तिः परिचयश्च :

'पालिः' भाषां प्रथमप्राकृतं देशीयभाषा अपि कथयन्ति । पालिशब्दस्यार्थोत्पत्तिविषये च भाषाविज्ञानकोषे एकादशमतानामुल्लेखमुपलभ्यते। तानि मतानि यथा :-

1. श्रीविधुशेखरभट्टाचार्येण ‘पालिः’ इति शब्दः पंक्तिः इति शब्दात् विकसितः इति कथ्यते। पंक्ति > पन्ति > पत्ति > पट्टि > पल्लि > पालि। आदौ पालिशव्दस्यार्थः बुद्धस्य पाक्तिं आसीत्। कालान्तरे एषा भाषारूपेण परिचिताऽभवत्।

2. पालिशब्दस्यविकासः पल्लिशब्दादभवत्। पल्लेः अर्थः ग्रामो भवति। ‘पालिः’ इत्यस्यार्थः ग्रामस्य भाषा भवति.

3. पालिभाषा सर्वप्राचीना इति भण्डारकारवाकरनागलभ्यां मतम्।

4. केषाञ्चित् विदुषां मतेन ‘पाल्’ रक्ष् धातोः निष्पन्नो भवति। अर्थात् बुद्धस्य वचनानां रक्षार्थं पालि भाषा भवति।

5. कैषाञ्चित् विदुषां मतेन पा (पाल् रक्ष) धातोः णिच् प्रत्ययेन पालिः निष्पन्नो भवति। अस्यार्थोऽपि बुद्धवचनानां रक्षार्थं पालि भाषा वर्त्तते।

6. ‘प्रालेय’ शब्दात् प्रालि > पालि शब्दस्य व्युत्पत्तिः इति मन्यते।

7. पालेः सम्बन्धः संस्कृतपर्यायशव्दात् जायते इति भिक्षुः जगदीश कश्यपमहोदयानां मतम्। पर्यायस्य प्राकृतरूपं परियायं धम्मपरियाय इति रूपेण प्रयोगः प्राचीने बौद्धसाहित्ये बुद्धोपदेशानां कृते व्यवहृतोऽभवत्। तेन परियाय > पलियाय >

पालिया > पालिशव्दः विकसितो भवति। अनेन पालेः अर्थ बुद्धस्योपदेशः भवति।

भिक्षुजगदीशकश्यपस्य मतमिदं सर्वैः स्वीकृतम्। यतः पालेः व्यवहारः प्राचीनेषु प्रयोगेषु बुद्धस्योपदेशार्थमिति उपलभ्यते। भाषायामर्थे पालेः प्रयोगः आधुनिकी भवति इति पाश्चात्यविद्वद्भिः क्रियते। अतः इदं स्पष्टं भवति यत् पालि शब्दस्य प्राचीनार्थः भवति बुद्धस्योपदेशः, परन्तु अधुना शब्दोऽयं बुद्धस्योपदेशानां भाषा बुद्धसाहित्यं वा अर्थे प्रयुक्तो भवति।

पालि कस्य प्रदेशस्य भाषा आसीत्? इति विषये विवादोऽस्ति। केचिदियं मगधस्य भाषा मन्यते। केचित् कलिङ्गस्य केचित् कौशलस्य, उज्जायिन्याः विन्ध्यस्य वा प्रदेशानां आसीदिति मन्यते। वस्तुतः पालि बुद्धस्य कालस्य भाषा नासीत्। सम्भवतः बुद्धेन उपदेशाः मागधीभाषया प्रदत्ताः। शतवर्षस्य परं यया भाषया अनुदिता भवति। सा पालि इति कथिता।

## 4.2.1 पालिसाहित्यं बैशिष्ट्यञ्च :

पालेः शव्दस्य मूलार्थेन प्रचलितार्थेन वा इदं स्पष्टं भवति यत्, पाले सम्बन्धः बौद्धसाहित्येन सह भवति। पालेः वर्गद्वयमासीत् । (१) पिटकं (२) अनुपिटकं च। साहित्येऽस्मिन् जातककथाः धम्मपदः,

मिलिन्दपञ्ह, बुद्धघोषस्य अष्टकथा, महावेशः इत्यादयः ग्रन्थाः, अन्तर्गताः भवन्ति। भारतवर्षस्य भाषासहितं लङ्का, वर्मा, तिब्बत, चीनी, श्यामादीनां देशानां भाषणामुपरि अपि पालिभाषायाः प्रभावः न्यूनाधिको वर्त्तते।

## 4.2.2. पालिभाषायाः ध्वनयः

1. वैदिकभाषायाः ध्वनिषु बहवः ध्वनयः पालिभाषायामुपलभ्यन्ते। वैदिकभाषायाः ळ, ळह ध्वनावपि यौ संस्कृते लुप्तावभवताम्। तौ पालिभाषायामुपलभ्येते।

2. वैदिकभाषायाः ध्वनिषु ऋ, ॠ, ए, औ (चत्वारः, स्वराः) श, ष, विसर्ग अघोषः, ह, जिह्वामूलीय, उपध्मानीय (षड व्यञ्जनाः) इति ध्वनीनामभावः पालिभाषायां वर्त्तते।

3. ह्रस्व ‘ऐ’ ‘ओ’ इति द्वौ नविनौ स्वरौ पालिभाषायामुपलभ्येते।

4. पालिभाषायां स्वरेषु ड़, ढ़ ध्वनयः प्रायः ळ, ळह ध्वनिरूपे रूपान्तरितौ भवतः।

5. पालिभाषायां नैकाः अघोषाः व्यञ्जनाः सघोषे रूपान्तरिताः भवन्ति। यथा :-

   क > ग = साकलः = सागलः।

   च > ज = स्रुचः = स्रुजा।

   त > द = उतोहो = उदाहो।

6. ‘श्’, ‘ष्’, इति ध्वनयोः स्थाने केवलं ‘स’ भवति। यथा :- एषः > ऐसो।

7. पालिभाषायां संयुक्तव्यञ्जनवर्णानां प्रायः समीकरणं भवति। यथा :-

| | | |
|---|---|---|
| घर्मः | > | धम्मः। |
| कर्मः | > | कम्मः। |
| तस्य | > | तस्सः। |

8. पालिभाषायां बलात्मकस्य स्वराधातस्य प्रयोगोऽभवत्।

9. पालिभाषायां स्वरभक्तिः, विषमीकरणं विपर्ययादयः बाहुल्येन वर्त्तन्ते।

10. ध्वनीनामिव शव्दरूपधातुरूपाणां दृष्ट्या अपि पालिभाषा वैदिकभाषायाः निकटतरा भवति। पालिभाषायां रूपेषु विविधत्वं परिलक्ष्यते। अनेकानि नवरूपाणि अपि विकसितानि भवन्ति।

11. धातुरूपेषु शब्दरुपेष्वपि द्विवचनस्य प्रयोगः पालिभाषायां नोपलभ्यते।

12. वैदिकभाषेव पालिभाषायां त्रिणि लिङ्गानि सन्ति।

13. धातुरूपेषु आत्मनेपदस्य प्रयोगः न्यूनो भवति।

14. प्रातिपदिकेषु व्यञ्जनान्तानां रूपाणां प्रयोगः स्वल्पो वर्त्तते।

15. शब्दसमूहदृष्ट्या पालिभाषायां तद्भव-शब्दानां प्रयोगः हि अधिको भवन्ति।

## 4.2.3. संस्कृतेन सह पालेः साम्यं वैषम्यमञ्च :

संस्कृतभाषया साकं पालिभाषायाः तुलना निम्नोक्तदिशा प्रतिपद्यते :-

1. संस्कृतभाषा प्राचीनार्यभाषा भवति। परन्तु पालिभाषा मध्यकालीनार्यभाषा भवति। यद्यपि अनयोः मूलभाषा वैदिकभाषा भवति, संस्कृतभाषा च व्याकरणनियमैः श्रृङ्खलिता नियमिता च भाषा भवति। परन्तु पालिः स्वतन्त्ररूपेण स्वाभाविकेन विकसिता भवति। अतः वैदिकभाषायाः नैकानि वैशिष्टयानि पालिभाषायां पूर्ववत् तिष्ठन्ति। परन्तु संस्कृतभाषायां विकसतरूपं वर्त्तते।

2. पालिभाषायां विसर्गः नोपलभ्यते। परन्तु संस्कृतभाषायां विसर्गः नियमितोऽस्ति।

3. संस्कृतस्य त्रिषु वचनेषु पालिभाषायामेकवचनं बहुवचनञ्चेति वर्त्तते। द्विवचनस्य प्रयोगो नास्ति।

4. पुंलिङ्ग क्लिवलिङ्गयोः विद्यमानयोः अपि शब्दरूपेषु साम्यं परिलभ्यते।

5. अ - ई - उ कारान्तानां शव्दानां रूपाणि करणापादानयोः कारकयोः सम्प्रदानसम्बन्ध्योः साम्यानि वर्त्तन्ते । पालिभाषायां परन्तु संस्कृते भिन्नरूपतां दृश्यते।

6. धातुरूपेषु गणभेदं स्वीकृतेऽपि गणाः प्रायतः समानाः भवन्ति। विशेषरूपेण श्वादिगणस्य प्रयोगः प्रमुखरुपेणाभवत्।

7. पालिभाषायां लिटः अभावोऽस्ति।

8. संस्कृतभाषायाः भूतकाले अटः आगमः पालिभाषायां लोपो भवति।

9. संस्कृतभाषायां परस्मैपद्यात्मनेपदीनां शब्दानां प्रयोगः नियमितोऽभवत्। परन्तु पालिभाषायां परस्मैपदीनां शब्दानां बहुलः प्रयोगः वर्त्तते। आत्मनेपदीनां शब्दानां प्रयोगः स्वल्पो भवति।

10. वैदिकभाषेव पालिभाषायामपि तवे - तुवे - तुये प्रत्यययुक्तानि रूपाणि तुमनन्तानि वर्त्तन्ते। उदाहरणं यथा :- गन्तवे, गणतुवे, पहातुये आदयः एवं पालिभाषायां वैदिकस्यैव ल्यवन्तान्तेषु रूपेषु अपि विविधत्वं वर्त्तते। परन्तु संस्कृते विविधता नास्ति।

## 4.2.4. शिलालेखीप्राकृतं वैशिष्ट्यञ्च :

1. शिलालेखीप्राकृतं अशोकीप्राकृतं अशोकान् प्राकृतं वा लाटप्राकृतं लेण इत्यपि कथ्यते। परन्तु सर्वेषु नामषु शिलालेखीप्राकृतमेव सर्वोपयुक्तम्।

2. राज्ञा अशोकेन स्वराज्ये प्राशासनिकानि धर्मिकसिद्धान्तानि प्रस्थरगात्रे खोदितानि। अभिलेखस्य लिपिः ब्राह्मी खरोष्ट्री च भवति । अशोकस्य विंशत्यभिलेखाः प्राप्ताः भवन्ति।

3. भाषाविज्ञानस्य दृष्ट्याभिलेखानां महत्त्वं सर्वाधिकं मन्यते। अभिलेखेषु तदानीन्तनः (इ.पू. द्वितीय शतकं) भाषायाः स्वरूपज्ञानं प्राप्यते। एतेषामभिलेखानां भाषासु स्थानगतभेदेन कथितभाषायाः भेदः दृश्यते। अतः इदं ज्ञायते स्व-स्व प्रदेशस्य कथितभाषायाः आधारणैव अभिलेखोत्कीर्णोऽभवत्। फलतः विभिन्नानां स्थालानां प्राकृतभाषाणां ज्ञानं वर्त्तते।

4. अशोकस्याभिलेखानां भाषायाः अध्ययनात् परं फ्रैंक, सेनार्ट, डॉ गुणे प्रभुतयः विद्वासः कस्मिञ्चित् एकस्मिन् निष्कर्षे नोपगच्छन्ति। विविधानां मतानामाधारेण अभिलेखेषु पञ्च कथितभाषा अङ्गीकृता सन्ति। यथा :-

१. उत्तर-पश्चिमी।

२. दक्षिण-पश्चिमी।

३. पूर्वी।

४. मध्यदेशी।

५. दक्षिणी।

## शिलालेखीप्राकृतस्य वैशिष्ट्यानि :-

1. शिलालेखीप्राकृतस्य ध्वनयः प्रायतः पालिभाषायां वर्त्तन्ते। सर्, र्, ल्, अ, ण ध्वनीनां प्रयोगे स्थलविशेषे अन्तरमुपलभ्यते। उदाहरणं यथा :- उत्तरीपश्चिमीकथितभाषायां श्, स्, ष्, त्रयः ध्वनयः

उपलभ्यन्ते। परन्तु दक्षिण - पश्चिमी कथितभाषायां पालि इव केवलं स ध्वनिः वर्त्तते।

2. संस्कृतात् यथा ध्वनेः विकासः पालिभाषायां भवति, तथैव ध्वनेः विकासः शिलालेखीप्राकृते दृश्यते।

3. पालिभाषा इव अधिकानि प्रातिपदिकानि स्वरान्तानि भवन्ति।

4. पालि इव द्विवचनं नास्ति।

5. शिलालेखीप्राकृतस्य पाल्या साकं बहु साम्यं प्राप्यते।

## 4.3. प्राकृतस्य उत्पतिः परिचयंञ्च :

भारतीयार्यभाषायाः कालविभाजनदृष्ट्या मध्यकालीनस्य भारतीयार्यभाषायाः द्वितीयकालस्य भाषा प्राकृतभाषा भवति। यद्यपि मध्यकालस्य सर्वाः भारतीयार्यभाषा सामान्यरूपेण 'प्राकृतम्' इति कथ्यते, तथापि मुख्यतः अस्य कालस्य साहित्यिकी भाषा इव प्राकृतभाषा भवति। अस्य समयः ख्री. प्रथमशतकादारभ्य ख्री. पञ्चमशतकं यावत् स्वीक्रियते।

### 'प्राकृतं' शब्दस्य व्युत्पत्ति :

प्राकृतस्य व्युत्पत्तिगतार्थः विविधैः विद्वद्भिः निम्नोक्तदिशा निरूपितो वर्त्तते। यथा :-

1. केषाञ्चित् वैयाकरणानां मतानुसारं प्राकृतस्य व्युत्पत्तिः प्राक् + कृतं भवति। यस्यार्थो भवति संस्कृतात् प्रागेव आसीत्। पाश्चात्यविदुषा पिशेल् महोदयेनापि मतमिदं स्वीकृतम्। अतः संस्कृतस्य मूलभाषा एव प्राकृतं भवति।

2. हेमचन्द्र-मार्कण्डेय-वासुदेवादीनां वैयाकरणानामनुसारं प्रकृतिः संस्कृतम्, तत्र भव प्राकृतमुच्यते अर्थात् संस्कृतात् उत्पन्ना भाषा प्राकृतं भवति।

3. परन्तु प्राकृतस्य सम्यगर्थो भवति, प्राकृतं स्वाभाविकं असंस्कृतं वा। यदा संस्कृतभाषा वैयाकरणनियमैः परिस्कृतमभवत्, तदा सा भाषा शिष्टाानां भाषा अभवत्। परन्तु या भाषा वैदिककालादेव जनानां कथितभाषा स्वाभाविकरूपेण प्रचलति, सा प्राकृतम् इति उच्यते। वैदिकलौककयोः संस्कृतयोः जनभाषायाः एव विकसितरूपं प्राकृतं भवति।

## 4.3.1. प्राकृतस्य भेदा :

1. धर्मसाहित्यं भाषाविज्ञानानामाधारेण प्राकृतस्य अनेके भेदाः विद्वद्भिः कृताः। यथा :-

   1. धर्मस्याधारेण प्राकृतस्य चत्वारो भेदाः सन्ति। यथा :-

      १. पालि २. अर्द्धमागधी ३. जैनमहाराष्ट्री ४. जैनशोरसेनी

2. साहित्यस्याधारेणापि अस्य चत्वारो भेदाः परन्तु नाम्ना विविधता दृश्यते। यथाः-

१. महाराष्ट्री २. शौरसेनी ३. मागधी ४. पैशाची

3. वैयाकरणवररुचि हेमचन्द्रादीनां मतेन अस्या संख्या 20-25 भवति।

4. परन्तु भाषाविज्ञानदृष्ट्या प्राकृतस्य केवलं पञ्चभेदाः सर्वमान्याः भवन्ति। यथा :-

१. मागधी २. अर्द्धमागधी ३. महाराष्ट्री ४. शौरसेनी ५. पैशाची

## 4.3.2. मागधीप्राकृतस्य परिचयः वैशिष्ट्यञ्च :

मगधस्य निकटवर्त्तिस्थाने भाषायाः विकसितत्वात् अस्याः नाम मागधीप्राकृतं भवति। मागधीप्राकृतस्य साहित्यिकरूपं नोपलभ्यते। संस्कृतनाटकेषु नीचपात्रैः अस्या प्रयोगः कृतं दृश्यते। अस्याः प्राचीनप्रयोक्ता अश्वघोषो भवति। मागधी गौड़ीनाम्नापि कथिता भवति।

**मागधीप्राकृतस्य वैशीष्टम् :-**

१. मागधीप्राकृतेः 'स्', 'ष्', इति स्थानयोः 'श' उपलभ्यते। यथा :-

सप्तः > शत्त।

पुरुषः > पुलिश।

२. ‘र्’ वर्णस्य स्थाने सर्वत्र ‘ल्’ दृश्यते। यथा :-

पुरुषः > पुलिश।

राजा > लाजा।

३. ‘स्’, ‘र्’, वर्णाभ्यां संस्कृतस्य ‘थ’ (स्थ, र्थ) वर्णस्य स्त, रूपं दृश्यते। यथा-

उपस्थितः > उवस्तिद।

अर्थ > अस्त।

४.‘ज्’ वर्णस्य स्थाने ‘स’ वर्त्तते। यथा :-

जाणादि > याणादि।

५. संयुक्त व्यञ्जनवर्णे यदि प्रथमध्वनिरुष्मो भवति, तर्हि तत्र समीकरणं न भवति। अन्यत्र तु भवति। यथा :- हस्त > हश्त।

६. संस्कृतस्य प्रथमाविभक्तेः एकवचनस्य विसर्गस्य मागधीप्राकृते ‘ए’ भवति। यथा :-

सः > शे।

देवाः > देवे।

## 4.3.3. अर्द्धमागध्याः परिचयः वैशिष्ट्यञ्च :

प्राकृतमिदं मागधशुरसेनयोः प्रदेशयोः मध्यक्षेत्रस्य कथितभाषायाः विकसितं प्राकृतरूपं भवति, यतः अस्यां मागधीप्राकृतस्य अपि काश्चित् प्रवृत्तयः दृश्यन्ते। अतः एषा ‘अर्द्धमागधी’ इति कथितं भवति। जैनसाहित्यस्य इयं प्रमुखभाषा भवति। मुद्राराक्षसे प्रवोधचन्द्रोदये च

अस्याः भाषायाः प्रयोगः दृश्यते। चर-सेठ-राजपुत्राणां भाषा अर्द्धमागधीति विश्वनाथेनापि उक्तम्-

चेटानां राजपुत्राणां श्रेष्ठानां चार्द्धमागधी / सा.द./III

**अर्द्धमागध्याः वैशिष्ट्यम् :-**

१. 'स्', 'ष' वर्णयोः अर्द्धमागध्यां प्रायतः 'स' विद्यते। यथा : -

श्रावकः > सावग।

२. दन्त्य 'त' वर्गस्य ध्वनीनां स्थाने मूर्धन्य 'ट' वर्गस्य ध्वनयः दृश्यन्ते। यथा :-

कृत्वा > कट्टु।

स्थितः > ठिय।

३. कुत्रचित् 'च' वर्गस्य स्थाने 'त' उपलभ्यते। यथा :-

चिकित्सा > तेइच्छा।

४. स्वराणां मध्ये लुप्तव्यञ्जनस्य स्थाने 'य्' श्रुतिः दृश्यते। यथा-

सागरः > सायर।

गगनः > गयन।

५. संस्कृतस्य प्रथमविभक्तेः एकवचनस्य विसर्गस्य स्थाने गद्ये 'ए' , पद्ये च प्रायतः - 'ओ' दृश्यते।

## 4.3.4. महाराष्ट्रीप्राकृतस्य परिचयः वैशिष्ट्यञ्च :

महाराष्ट्रीप्राकृतस्य मूलाधारः महाराष्ट्रप्रदेशत्वात् अस्य नाम महाराष्ट्रीप्राकृतं भवति। केचित् विद्वांसः महा + राष्ट्र = महान् राष्ट्र् तात्पर्येन समग्रभारतवर्षस्य भाषात्वेन गृहीत्वा तत्कालीनस्य भारतस्य राष्ट्रभाषा मन्यते। महाराष्ट्री काव्यस्य भाषा आसीत्। अतः अनया भाषया बहुसाहित्यमुपलभ्यते। गद्यरूपेण अस्य प्रयोगः श्वेताम्बरजैनानां धार्मिकग्रन्थेषु भवति। कालिदासहर्षादीनां महाकवीनां नाटकेषु पद्यानां भाषा महाराष्ट्रीप्राकृतं भवति. महाराष्ट्रीप्राकृतं सर्वासु प्राकृतभाषासु परिपूर्णा इति स्वीक्रियते। सर्वे वैयाकरणाः इमां भाषामाधारीकृत्य प्राकृतभाषायाः व्याकरणं लिखितवन्तः।

**महाराष्ट्रीप्राकृतस्य वैशिष्टयम् :**

1. महाराष्ट्रीप्राकृते द्वयोः स्वरयोः मध्यवर्त्तीनां अल्पप्राणस्पर्शानां (क्, त्, प्, ग्, द्, व्) प्रायः लोपो भवति। यथा -

   नुपुरुं > णेउर।

   प्राकृतं > पाअड़।

   लोको > लोओ।

गच्छति > गच्छइ।

2. द्वयोः स्वरयोः मध्यवर्त्तीनां महाप्राणानां (ख्, थ्, फ्, ध्, भ्) स्थाने केवलं 'ह' वर्त्तते। यथा -

शाखा > शाहा।

नाथः > नाहो।

क्रोधः > कोह।

3. उष्माणां स्थानेऽपि प्राय 'ह' ध्वनि विद्यते। यथा -

पाषाण > पाहाण।

दिवसः > दिवह।

तस्य > ताह।

दश > दह।

4. कर्मवाच्यस्य 'गम्यते' स्थाने 'गमिज्जहि' इव रूपं विद्यते। अर्थात् य स्थाने इज्ज भवति।

5. पूर्वकालिकायाः क्रियायाः प्रत्यये ऊण उपलभ्यते।

यथा -संस्कृतस्य पृष्ट्वा स्थाने पुच्छिऊण।

## 4.3.5. शौरसेन्याः परिचयः वैशिष्ट्यञ्च :

शुरसेनप्रदेशात् (आधुनिकमथुरा) विकसितत्वात् प्राकृतमिदं शौरसेनीप्राकृतमिति कथ्यते। अस्या उपरि संस्कृतस्य प्रभावः दृश्यमानः भवति, यतः तदा मध्यदेशः संस्कृतस्य केन्द्रः आसीत्। संस्कृतनाटकेषु गद्यम् अनया शैरसेन्या वर्त्तते। कपूरमञ्जरीकाव्यस्य गद्यभागः अनया रचितः। तथा दिगम्बरजैनानां धर्मग्रन्थाः अनया भाषया रचिताः सन्ति।

**शौरसेन्याः वैशिष्टयम् :**

1. शौरसेन्यां द्वयोः स्वरयोः मध्यवर्त्तिनोः त्, थ् वर्णयोः यथाक्रमेण दधौ भवतः। यथा -

   भवति > होदि।

   कथय > कधोहि।

2. द्वयोः स्वरयोःमध्यवर्त्तिनी द, ध, ध्वनी अपरिवर्त्तितौ भवतः। यथा

   जलदः > जलदो।

   क्रोधः > क्रोधो।

3. शौरसेन्याः क्ष स्थाने क्ख दृश्यते। यथा -

   ईक्षु > इक्खु।

4. शब्दरूपाणां धातुरूपाणाञ्च दृष्टया शौरसेनी संस्कृतभाषया प्रभाविता दृश्यते।

5. अस्यां भाषायां आत्मनेपदस्य लोपो भवति। अतः परस्मैपदानामेव प्रयोगः वर्त्तते।

## 4.3.6. पैशाच्याः परिचयः वैशिष्ट्यञ्च :

महाभारते पिशाचनामा जातिः आसीत्। येषां निवासक्षेत्रं उत्तर-पश्चिमे कश्मीरस्य निकटे मन्यते। अस्याधारेण ग्रियर्सन महोदयेन पैशाची दरदभाषया प्रभाविता इति स्वीक्रियते। हार्नल महोदयानुसारं इयं द्राविड़स्य भाषा आसीत्। परन्तु वररुचेः अनुसारेण अस्याधारं संस्कृतं भवति। सामान्यतः इयं भाषा साहित्यशून्या भवति। हम्मीरमर्दनं इव स्वल्पेषु नाटकेषु कानिचित् पात्राणि अस्याः व्यवहारं कृतवन्तः। प्राकृतसर्वस्वे अस्याः एकादशभेदा उल्लिखिताः सन्ति।

**पैशाच्याः वैशिष्टयम् :**

1. द्वयोः स्वरयोः मध्यवर्त्तीनां वर्ण्णानां तृतीय, चतुर्थ स्पर्शवर्णाः पैशाच्यां वर्गस्य प्रथमे द्वितीये अघोषे परिवर्त्तिताः भवन्ति। यथा –

   गगनम् > गकन।

   मेघः > मेखो।

   राजा > राचा।

2. 'र्' वर्णस्य स्थाने 'ल्', 'ल्' स्थाने च 'र्' वर्णस्य प्रयोगः दृश्यते यथा -

रुधिरः > लुधिरं।

कुमारं > कमालं।

3. 'ष' वर्णस्य पैशाचीभाषायां कुत्रचित् 'श', कुत्रचित् च 'स्' अपि दृश्यते। यथा -

विषमः > विसको।

तिष्टति > चिश्तदि।

4. स्वरयोः मध्यवर्त्तीनां स्पर्शाणां अस्यां भाषायां लोपो न भवति, यथा अन्यप्राकृतेषु प्रायः दृश्यते।

## 4.3.7. द्वितीयप्राकृतस्य वैशिष्ट्यानि

द्वितीयप्राकृतस्य वैशिष्टयानि निम्नोक्तदिशा प्रतिपद्यते।

1. प्राकृतभाषायाः ध्वनयः प्रायतः पालिभाषा इव भवन्ति। परन्तु उष्मध्वनिषु (श, ष, स) विविधता विद्यते। पालिभाषायां यत्र केवलं स वर्णस्य एव प्रयोगः उपलभ्यते, तत्र प्राकृतस्य विविधेषु भेदेषु अधिकांशे केवलं 'स', कतिपयेषु 'श', अन्यत्र 'स्', 'श', पुनश्च 'श्', 'ष्', वर्णायोः प्रयोगः उपलभ्यते।

2. प्राकृतस्य विविधेषु भेदेषु रलयोः परस्परं विपर्ययः दृश्यते।

3. प्राकृते 'य्' प्रायतः 'ज्' वर्णे रूपान्तरितो भवति।

4. प्राकृते आधुनिकाः 'ग्', 'ध्', 'ज्', सघोष-स्पर्शानां प्रयोगः दृश्यते।

5. न वर्णस्य प्रायतः ण् भवति।

6. पालिभाषायां प्रारम्भस्य ध्वनिपरिवर्त्तनस्य लोपः स्वरभक्तिः समीकरणादयः प्रवृत्तयः प्राकृते पूर्णतः नियमिताः भवन्ति।

7. स्वरयोः मध्यवर्त्तिनः अल्पप्राणस्य स्पर्शस्य लोपो भवति।

8. स्वरयोः मध्यवर्त्तीनः महाप्राणानां स्पर्शानां स्थाने 'ह' भवति।

9. संस्कृतभाषायाः विसर्गः प्राकृते कुत्रचित् 'ए', कुत्रचित्तु 'ओ' भवति।

10. 'म' वर्णस्य स्थाने 'ब' भवति।

11. घोषस्पर्शाः अधोषरूपेण अधोषस्पर्शाश्च घोषरूपेण परिवर्त्तिताः भवन्ति।

12. प्राकृते प्रायः सर्वे व्यञ्जनान्ताः शब्दाः स्वरान्ताः भवन्ति।

13. शब्दरूपेषु द्विवचनस्य लोपो भवति।

14. सादृशहेतोः शब्दरूपाणि स्वल्पानि भवन्ति।

15. धातुरूपेष्वपि द्विवचनस्य लोपः भवति।

16. आत्मनेपदस्य लोपो भवति।

17. वैदिकलौकिकसंस्कृतपालिप्रभृतयः भाषाः संयोगात्मिकाः आसन् अर्थात् वाक्यरचनायां सम्बन्धतत्त्वम् अर्थतत्त्वेन सह संयुक्तम् आसीत्।

उदाहरणम् - रमेशस्य गृहम्। परन्तु प्राकृतभाषा वियोगात्मिका आसन् । अर्थात् सम्बन्धतत्त्वस्य प्रयोगः अर्थतत्त्वात् पृथकरूपेण अभवत्। यथा - रामेशस्य केरकधरम् (प्राकृतम्)।

18. नैकानां संस्कृतशब्दानाम् अर्थेष्वपि परिवर्त्तनं भवति।

19. प्राकृतभाषायां अधिकतराः शब्दाः तदभवाः भवन्ति। केचन देशजाः भवन्ति।

20. प्राकृतभाषायां बलात्मकस्वराघातः आसीत्।

21. पालिभाषायां सरलीकरणस्य या प्रवृत्तिः प्रारम्भः अभवत्, तस्य अत्र बहुबिकासोऽभवत्।

## 4.4. तृतीयप्राकृतं अपभ्रंशः वा

मध्यकालीन भारतीयार्यभाषायाः तृतीयप्राकृतकालस्य भाषा अपभ्रंशमिति कथ्यते। अपभ्रंशस्यार्थो भवति विकृतं भ्रष्टं पतितं वा। यदा प्राकृतभाषासु साहित्यं व्याकरणवद्धत्वेन रचितमभवत्, प्राकृतं साहित्यिकं कथितमिति रूपेण द्विविधं भवति स्म। कालान्तरे

कथितप्राकृतात् अपभ्रंशभाषायाः विकासोऽभवत्। तदनन्तरम् अपभ्रंशभाषातः भारतीयाधुनिकभाषायाः उत्पत्तिरभूत्।

**अपभ्रंशस्य काल :**

विभाजनदृष्ट्या अस्य समयः 500 खी. 1000 खी. यावत् स्वीकृतोऽस्ति। परन्तु अस्य प्रयोग साहित्ये इतः पूर्वं प्रायतः 25-26 शतकं यावत् अभवत्।

अपभ्रंशस्य शब्दरूपे प्रयोगः सर्वपर्थमं व्याड़िना पतञ्जलिना च क्रियते। भाषायामर्थे सर्वपर्थमम् अस्योल्लेखः खी. पञ्चमशतके भामहेन काव्यालंकारे चण्डेन च 'प्राकृतलक्षेणं' इति ग्रन्थे कृतः।

**अपभ्रंशस्य साहित्यम् :**

यद्यपि भाषेयं विकृता भवति, तथापि अनया भाषया साहित्यग्रन्था उपलभ्यन्ते। यथा - रइधुकृतं करकंडचरिउ, धर्मसूरीकृतं जम्बूस्वामीरासा, पुष्पदन्तकृतं आदिपुराणं, सरहकृतं दोहाकेशः, स्वयम्भवकृतं पउमचरिउ, धनपालकृतं भविस्सयत्तकहा, तथा रामसिंहकृतं पाहुड़ादोहा इत्यादयः ग्रन्थाः, प्रमुखाः भवन्ति।

## 4.4.1. अपभ्रंशस्य भेदाः :

याकोविप्रभुतयः विद्वांसः अपभ्रंशस्य भेदानामुपरि बहुतथ्यं प्रददति। तदनुसारम् अपभ्रंशस्य संख्या द्वाभ्यामारभ्य सप्तविंशतिं यावत् मन्यते।

परन्तु अपभ्रंशस्य सप्तरूपाणि सन्ति, यस्मात् त्रयोदशः आधुनिकाः भारतीयाभाषा उत्पन्नाः भवन्ति।

| | **अपभ्रंशाः** | | **विकसिताः आधुनिकाः भारतीय भाषाः** |
|---|---|---|---|
| १. | मागधी | > | बिहारी, वंगाली, उड़िआ, असमिया। |
| २. | अर्धमागधी | > | पूर्वी हिन्दी। |
| ३. | महाराष्ट्री | > | मराठी। |
| ४. | खश | > | पहाड़ी (प्राचीनराजस्थानी) । |
| ५. | ब्राचड़ | > | सिन्धी। |
| ६. | शौरसेनी | > | पश्चिमी हिन्दी, राजस्थानी, गुजुराती। |
| ७. | पैशाची | > | लहँदा, पञ्जावी। |

## 4.4.2. अपभ्रंशस्य वैशिष्टयानि :

1. अपभ्रंशस्य ध्वनयः प्रायतः पालि, प्राकृत भाषा इव भवन्ति।
2. 'ऋ' स्वरस्य केवलं लिखितरूपमासीत्, उच्चारणं नास्ति।
3. 'श', 'ष' वर्णयोः स्थाने केवलं स तिष्ठति।
4. 'ऋ' विहाय सर्वेषां स्वराणामनुनासिकरूपं विद्यते।
5. अपभ्रंशे उ ध्वनेः बाहुल्यं वर्त्तते। यथा - जग्गु, एक्कु, कारणु, इत्यादयः।

6. पालिप्राकृतयोः भाषयोः ध्वनिपरिवर्त्तनस्य याः प्रवृत्तयः आसन्, ताः अपभ्रंशे अधिकविकसिताः अभवत्।

7. अपभ्रंशशव्दस्य अन्तिमः स्वरः प्रायः ह्रस्वो भवति। कदाचित् लुप्तोऽपि भवति। यथा -

| **संस्कृतं** | **-** | **अपभ्रंशः** |
|---|---|---|
| गर्भिणी | > | गब्भिणि। |
| कीटकं | > | क्रीड़। |

8. आद्यक्षरे किञ्चिदपि परिवर्त्तनं न भवति।

9. अपभ्रंशे निम्नलिखितानि परिवर्त्तनानि प्रायः दृश्यन्ते। यथाः -

‘व’ वर्णस्य स्थाने ‘ब’ - वचनम् > वअण।

‘भ’ वर्णस्य स्थाने ‘वँ’ - कमलं > कवँलं।

‘ष्ण’ वर्णस्य स्थाने ‘न्ह’ - कृष्ण > कान्ह।

‘क्ष’ वर्णस्य स्थाने ‘क्ख’ - पक्षी > पक्खी।

‘च्छ’ -पक्षी > पच्छी।

‘स्म’ वर्णस्य स्थाने ‘म्ह’ - अस्मै > अम्ह।

‘य’ वर्णस्य स्थाने ‘ज’ - युगलं > जुगलं।

‘द’ वर्णानां स्थाने ‘ल’ - प्रदीप्तः > पलितः

10. संयुक्तव्यञ्जनेषु एकस्य लोपो भवति। तत्र पूर्वस्य वर्णस्य दीर्घः भवति।

| **संस्कृतं** | **प्राकृतं** | **अपभ्रंशः** |
|---|---|---|
| कस्य | कस्स | कासु |

11. शब्दरूपाणां धातुरूपाणाञ्च ह्रसत्वेन अपभ्रंशभाषा अधिका सरला अभवत्।

12. क्लीवलिङ्गं नासीत्।

13. अकारान्तं पुंलिङ्गं प्रमुखमभवत्।

14. द्विवचनं लुप्तमभवत्।

15. अपभ्रंशे त्रिणि कारकाणि आसन्।

१. कर्त्ता, कर्म, सम्बोधनम्।

२. करणं, अधिकरणं।

३. सम्प्रदानं, अपादानं, सम्बन्धः, दौ वचने, एकवचनं बहुवचनञ्च।

अतः शब्दरूपाणां 3 x 2 = 6 षडरूपाणि विद्यन्ते।

16. अपभ्रंशे वियोगात्मकस्य प्रवृत्तिः स्पष्टो भवति। काराकाणां कृते स्वतन्त्र शब्दानां प्रयोगोऽभवत्। यथाः -

करणकारकस्य कृते सहु , तेण।

सम्बन्धस्य कृते केर को।

अधिकरणस्य कृते मज्झ महँ, इत्यादयः।

क्रियारूपेष्वपि संयुक्तानां क्रियाणां प्रयोगोऽभवत्। तिङन्तानां रूपाणां स्थाने कृदन्तानां रुपाणां प्रयोगः बहुलमभवत्।

17. वाक्ये पदानां स्थानं निश्चतमभवत्।

18. अपभ्रंशे तद्भव शव्दानां संख्या सर्वाधिकाः भवन्ति। तदन्तरं देशज शव्दाः भवन्ति। तत्समशव्दानां संख्याः न्यूनाः भवन्ति। वैदेशिकाः शव्दाः सन्ति। तुर्क, तहसील। एवं रुपेण अपभ्रंशभाषातः भारतीय भाषाः समुत्पन्नाः अभवन्।

**वैदिकलौकिकसंस्कृतयोः वैशिष्ट्यम्**

## वैदिकसंस्कृतम्

१. वैदिकभाषायां संगीतात्मकस्य स्वराधातस्य च प्राधान्यं भवति।

२. स्वरवर्णेषु उदात्तानुदात्तस्वरितञ्च स्वराः वर्त्तन्ते।

३. स्वरवर्णानां ह्रस्व-दीर्घ-प्लुत इति उच्चारणं भवन्ति।

४. वैदिकभाषायां 'लृ' स्वरस्य प्रयोगः वहुलं भवति।

५. वैदिकभाषायां ळ, ळ्ह, जिह्वामूलीयः उपध्मानीयः इति चत्वारः व्यञ्जनाः भवन्ति।

६. स्वरभक्तेः प्रयोगः आसीत्।

७. सन्धिनियमानां पालनं अनिवार्यं न भवति। अनेके अपवादाः सन्ति।

८. शब्दरूपेषु विविधरूपत्वं वर्त्तते। शब्दस्य विभक्तौ वचने च नैकानि रूपाणि वर्त्तन्ते।

९. धातुरूपाणां दृष्ट्या वैदिकभाषा सम्पन्नाधिका आसीत्। धातोः नैकेषु रुपेषु अर्थषु च प्रयोगो दृश्यते।

१०. आत्मनेपदपरस्मैपदयोः स्वतन्त्रनियमः नास्ति।

११. वैदिकभाषायां लङ् लृट् लिट् लकाराणां प्रयोगः सर्वेषु कालेषु अभवत्।

१२. वैदिकभाषायां लेट्लकारेण साकं एकादशलकाराः सन्ति।

१३. वैदिकभाषायां एकस्मिन्नेव अर्थे प्रत्ययानां विविधानि रूपाणि उपलभ्यन्ते। यथा - तुमुनर्थे तुमना सह पञ्चदशप्रत्ययाः सन्ति। तथा क्त्वा अर्थे त्रयः अन्ये प्रत्ययाः सन्ति।

१४. वैदिकभाषायामुपसर्गाणां प्रयोगः धातोः पृथक्रुपेण दृश्यते।

१५. श्रेष्ठतावाचकानां प्रत्ययानां प्रयोगः संज्ञाभिः साकं भवति। यथा - कवितरः, कवितमः

१६. वैदिकभाषायां अक्तु, अमुरः, ईमः, उक्यः, ऊतिः, ऋदुदरः, दृशीकः, विचर्षणी,सीमः इत्यादिनां शब्दानां प्रयोगः दृश्यते।

१७. वैदिकभाषायां अधोलिखितानां शब्दानामर्थः बहुधा आसीत्।

क. अरि - ईश्वरः, धार्मिकः, शत्रु।

ख. अरातिः - शत्रुता, कृपणता।

ग. क्षिति - निवासस्थली, नगरं, मनुष्यः।

घ. न - यथा, नास्ति।

ङ. मुलीकः - कृपालु, अनुग्रह।

च. वध - भयानकः, शत्रुः।

## लौकिकसंस्कृतम्

१. संस्कृतभाषायां बलात्मकस्य स्वराधातस्य प्राधान्यं वर्त्तते।

२. स्वरवर्णेषु उदात्तानुदात्तस्वरितञ्च स्वराः न सन्ति।

३. स्वराणां ह्रस्वदीर्घयोः उच्चारणं वर्त्तते। प्लुतस्योच्चारणं नास्ति।

४. 'ॡ' स्वरस्य लोपोऽभवत्।

५. संस्कृतभाषायां ळ, ळ्ह जिह्वामूलीयः, उपध्मानीय इति चत्वारः व्यञ्जनाः न सन्ति।

६. स्वरभक्तेः प्रयोगो न भवति।

७. सन्धिनियमानां पालनं अनिवार्यं नियमैः भवति।

८. शब्दरूपेषु एकरूपत्वं वर्त्तते। शव्दस्य नैकानि रुपाणि न वर्त्तन्ते।

९. घातुरुपेषु विविधत्वं स्वल्पं अस्ति। धातुरूपाणां काल-विभक्तीनां स्वरूपञ्च नियमितं वर्त्तते।

१०. आत्मनेपदीनां परस्मैपदीनाञ्च धातूनां प्रयोगः नियमपूर्वको भवति।

११. एतेषामतीतकाले एव प्रयोगो भवति।

१२. लेट् लकारस्य अभावे लकाराः दशः सन्ति।

१३. प्रत्ययानां विविधरूपं नास्ति। एकस्मिन्नर्थे एकस्य प्रत्ययस्य प्रयोगो भवति।

१४. उपसर्गाणां स्वतन्त्रप्रयोगः समाप्तः भवति। संस्कृतभाषायां धातुना सह एव प्रयुक्तो भवति।

१५. संस्कृतभाषायां श्रेष्ठतावाचकानां प्रत्ययानां प्रयोगः विशेषणैः सह दृश्यते। यथा - सुन्दरतमः, सुन्दरतरः

१६. अक्त्वादीनां वैदिकशब्दानां प्रयोगः संस्कृत भाषायां न दृश्यते।

१७. संस्कृतभाषायां एतेषां शब्दानामर्थे परिवर्त्तनं दृश्यते।

क. अरि - शत्रुः।

ख. अरातिः - शत्रु।

ग. क्षिति - पृथ्वी।

घ. न - नास्ति।

ङ. मृलीकः शिवः।

च. वघः - वधः।

## 5.1. MODEL QUESTION

**Group - A**

**प्रश्नानामुत्तरं एकेन पदेन वाक्येन वा लिखत।** **1**

1. ऋगवेदे कति मण्डलानि सन्ति?
2. वैदिकभाषायाः संयुक्तस्वराणां नामानि लिखत।
3. शिशुपालवधस्य रचयिता कः?
4. पार्सीयानां धर्मग्रन्थस्य नाम किम्?
5. पालिः शव्दस्यार्थः कः ?

**Group - B**

**प्रश्नानां संक्षिप्तमुत्तरं पञ्चाशत् पदैः (50) विवृण्बुत।** **5**

1. वैदिकभाषायाः ध्वनीनां नाामानि लिखत।
2. संस्कृतभाषायाः ध्वनीनां नामानि लिखत।
3. मागध्याः वैशिष्टयं लिखत।
4. पालिशव्दस्य व्युत्पत्तिं लिखत।
5. अर्द्धमागध्याः वैशिष्ट्यं लिखत।

**Group - C**

**प्रश्नानामुत्तरमं द्विशतं परिमितैः पदैः(200) विशदयत।** **10**

1. वैदिकावेस्तयोर्मध्ये साम्यं वैषम्यञ्च आलोचयत।
2. वैदिकलौकिकसंस्कृतयोर्मध्ये साम्यं वैषम्यञ्च आलोचयत।
3. पालिभाषायाः सम्यक् परिचयं दत्त्वा वैशिष्ट्यानि लिखत।

4.  प्राकृतभाषायाः व्युत्पत्तिः वैशिष्ट्यञ्च लिखत।

5.  पालिसंस्कृतयोः साम्यं वैषम्यञ्च आलोचयत।

## Group - D

**प्रश्नानामुत्तरं पञ्चाशतत्तोरद्विशतं परिमितैः पदैः(250) विशदयत।** **15**

1.  वैदिकभाषायाः सम्यक् परिचयं दत्त्वा वैशिष्टयानि लिखत।

2.  प्राकृतस्य परिचयमुल्लिख्य भेदान्नालोचयत।

3.  पालेः परिचयं वैशिष्ट्यञ्च आलोचयत।

4.  संस्कृतस्य परिचयं वैशिष्ट्यञ्च आलोचयत।

5.  अपभ्रंशस्य परिचयं वैशिष्ट्यञ्च आलोचयत।

## 6.1. FURTHER READINGS

**सहायकग्रन्था:**


1. भाषाविज्ञान, डॉ कर्ण सिंह ,साहित्यभण्डार, मेरठ -२
2. भाषाविज्ञान एवं भाषा-शास्त्र, कपिलदेव द्विवेदी, विश्वविद्यालय प्रकाशन, वाराणसी।
3. भाषाविज्ञान, डॉ भोलानाथ तिवारी, किताव महल, इलाहाबाद।
4. भाषाविज्ञानम् (संस्कृतम्) शारदा चतुवैदी, भारतीय-वद्या-संस्थानम्, वाराणसी
5. Elements of Science of Language, I.J.S. Taraporewala
6. Linguistic Introduction to Sanskrit, B.K. Ghosh.